श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीन्यासतिलकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीन्यासतिलकम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे।
वृणीमहे च तत्राद्यौ दंपती जगतां पती॥ १ ॥

प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन्।
हस्तः श्रीरङ्ग भर्तुर्मां अव्यादभय मुद्रितः॥ २ ॥

अनादेर्निःसीम्नो दुरित जलधेर्यन्निरुपमं
विदुः प्रायश्चित्तं यदु रघु धुरीणाशय विदः।
तदारम्भे तस्या गिरमवदधानेन मनसा
प्रपद्ये तामेकां श्रियमखिल नाथस्य महिषीम्॥ ३ ॥

महेन्द्राग्नी विष्णु प्रभृतिषु महत्त्व प्रभृतिवत्
प्रपत्तव्ये तत्त्वे परिणमित वैशिष्ट्य विभवाम्।
अधृष्यत्वं धृत्वा कमितुरभिगम्यत्व जननीं
श्रियं शीतापाङ्गामहमशरणो यामि शरणम्॥ ४ ॥

स्वतः सिद्धः श्रीमानमित गुण भूमा करुणया
विधाय ब्रह्मादीन् वितरति निजादेशमपि यः।
प्रपत्त्या साक्षाद् वा भजन शिरसा वाऽपि सुलभं
मुमुक्षुर्देवेशं तमहमधिगच्छामि शरणम्॥ ५ ॥

बृन्दानि यः स्व वशयन् व्रज सुन्दरीणां
बृन्दा वनान्तर भुवां सुलभो बभूव।
श्रीमानशेष जन संग्रहणाय शेते
रङ्गे भुजङ्ग शयने स महा भुजङ्गः॥ ६ ॥

रङ्गास्तीर्ण भुजङ्ग पुङ्गव वपुः पर्यङ्कवर्यं गतौ
सर्ग स्थित्यवसान केळि रसिकौ तौ दंपती नः पती।
नाभी पङ्कज शायिनः श्रुति सुखैरन्योन्य बद्ध स्मितौ
डिम्भस्याम्बुज संभवस्य वचनैरोंतत्सदित्यादिभिः॥ ७॥

घन करुणा रसौघ भरितां परिताप हरां
नयन महश्छटां मयि तरङ्गय रङ्गपते।
दुरित हुताशन स्फुरित दुर्दम दुःख मषी-
मलिनित विश्व सौध दुरपह्नव वर्ण सुधाम्॥ ८॥

दुर्मोचोद्भट कर्म कोटि निबिडोऽप्यादेश वश्यः कृतः
बाह्यैर्नैव विमोहितोऽस्मि कुदृशां पक्षैर्न विक्षोभितः।
यो माहानसिको महान् यतिपतेर्नीतश्च तत्पौत्रजान्
आचार्यानिति रङ्गधुर्य मयि ते स्वल्पावशिष्टो भरः॥ ९॥

आर्तेष्वाशुफला तदन्य विषयेऽप्युच्छिन्न देहान्तरा
वह्न्यादेरनपेक्षणात् तनुभृतां सत्यादिवद् व्यापिनी।
श्रीरङ्गेश्वर यावदात्म नियत त्वत्पारतन्त्र्योचिता
त्वय्येव त्वदुपाय धीरपिहित स्वोपाय भावाऽस्तु मे॥ १०॥

त्वय्याचार्यैर्विनिहित भरास्तावका रङ्गनाथ
त्वत्कैङ्कर्य प्रवण मनसस्त्वद्गुणास्वाद मत्ताः।
त्वय्येकस्मिन्नपि विजहतो मुक्तवत् साधनत्वं
त्वच्छेषत्व स्वरस रसिकाः सूरयो मे स्वदन्ताम्॥ ११॥

कल्प स्तोमेऽप्यपास्त त्वदितर गतयोऽशक्ति धी भक्ति भूम्ना
रङ्गेश प्रातिकूल्य क्षरण परिणमन्निर्विघातानुकूल्याः।
त्रातारं त्वामभेद्याच्छरण वरणतो नाथ निर्विघ्नयन्तः
त्वन्निक्षिप्तात्म रक्षां प्रति रभस जुषः स्व प्रवृत्तिं त्यजन्ति॥ १२॥

त्यक्तोपाय व्यपायांस्तदुभय करणे सत्रपान् सानुतापान्
भूयोऽपि त्वत्प्रपत्त्या प्रशमित कलुषान् हन्त सर्वंसहस्त्वम्।

रङ्गिन् न्यासान्तरङ्गाखिल जन हितता गोचर त्वन्निदेश-
प्रीति प्राप्त स्ववर्णाश्रम शुभ चरितान् पासि धन्यान् अनन्यान्॥ १३ ॥

शोकास्पदांश मथनः श्रयतां भवाब्धौ
रागास्पदांश सहजं न रुणत्सि दुःखम्।
नो चेदमी जगति रङ्गधुरीण भूयः
क्षोदिष्ठ भोग रसिकास्तव न स्मरेयुः॥ १४ ॥

हेतुर्वैधे विमर्शे भजनवदितरत् किं त्वनुष्ठान काले
वेद्य त्वद्रूप भेदो विविध इह स तूपायतान्यानपेक्षा।
रङ्गिन् प्रारब्ध भङ्गात् फलमधिकमनावृत्तिरुक्तेष्टिवत् स्यात्
नाना शब्दादि भेदात् प्रपदन भजने सूचिते सूत्र कारैः॥ १५ ॥

भक्तौ रङ्गपते यथा खलु पशुच्छागादिवत् वेदन-
ध्यानोपासन दर्शनादि वचसामिच्छन्त्यभिन्नार्थताम्।
व्यक्त्यैक्याच्छरणागति प्रपदन त्यागात्म निक्षेपण-
न्यासाद्येषु तथैव तन्त्र निपुणैः पर्यायता स्मर्यते॥ १६ ॥

विश्वासायास भूम्नोर्न्यसन भजनयोर्गौरवे को विशेषः
तत्सद्भावेऽपि धर्मान्तर इव घटते कर्तृभेदाद् विकल्पः।
तद्भेदो रङ्गशायिन्ननितर गतितादुत्थ शोकातिरेकात्
सद्विद्यादौ विकल्पस्त्वभिमति भिदया तेन तत्रैकराश्यम्॥ १७ ॥

ध्रुवमधिकृति भेदात् कर्मवत् रङ्गशायिन्
फलति फलमनेकं त्वत्पदे भक्तिरेका।
शरण वरण वाणी सर्व हेतुस्तथाऽसौ
कृपण भजन निष्ठा बुद्धि दौर्बल्य काष्ठा॥ १८ ॥

कर्तव्यं सकृदेव हन्त कलुषं सर्वं ततो नश्यति
ब्रह्मेशादि सुदुर्लभं पदमपि प्राप्यं मया द्रागिति।
विश्वास प्रतिबन्धिचिन्तनमिदं पर्यस्यति न्यस्यतां
रङ्गाधीश रमापतित्व सुभगं नारायणत्वं तव॥ १९ ॥

धी कर्म भक्ति रहितस्य कदाऽप्यशक्त्या
    रङ्गेश भाव कलुष प्रणति द्वयोक्तेः।
मन्ये बलं प्रबल दुष्कृत शालिनो मे
    त्वन्मूल देशिक कटाक्ष निपातमाद्यम्॥ २० ॥

अन्धोऽनन्ध ग्रहण वशगो याति रङ्गेश यद्वत्
    पङ्गुर्नौका कुहर निहितो नीयते नाविकेन।
भुङ्क्ते भोगानविदित नृपः सेवकस्यार्भकादिः
    त्वत्संप्राप्तौ प्रभवति तथा देशिको मे दयालुः॥ २१ ॥

उक्त्या धनञ्जय विभीषण लक्ष्यया ते
    प्रत्याय्य लक्ष्मण मुनेर्भवता वितीर्णम्।
श्रुत्वा वरं तदनुबन्ध मदावलिप्ते
    नित्यं प्रसीद भगवन् मयि रङ्गनाथ॥ २२ ॥

सकृदपि विनतानां सर्वदे सर्वदेहिनि
    उपनिषदभिधेये भागधेये विधेये।
विरमति न कदाचिन्मोहतो हा हतोऽहं
    विषम विषय चिन्ता मेदुरा मे दुराशा॥ २३ ॥

यावज्जीवं जगति नियतं देह यात्रा भवित्री
    त्यक्ताः सर्वे त्रिचतुर दिन ग्लान भोगा नभोगाः।
दत्ते रङ्गी निजमपि पदं देशिकादेश काङ्क्षी
    किं ते चिन्ते परमभिमतं खिद्यसे यत् पुनस्त्वम्॥ २४ ॥

अपि मुहुरपराधैरप्रकम्प्यानुकम्पे
    वहति महति योग क्षेम बृन्दं मुकुन्दे।
मद कलुष मनीषा वज्र लेपावलेपान्
    अनुगुणयितुमीहे न प्रभूनप्रभूतान्॥ २५ ॥

मातर्भारति मुञ्च मानुष चटून् हे देह लब्धैरलं
    लुब्ध द्वार दुरासिका परिभवैस्तोषं जुषेथा मनः।
वाचः सीमनि रङ्ग धामनि महानन्दोन्नमद्भूमनि
    स्वामिन्यात्मनि वेङ्कटेश्वर कवेः स्वेनार्पितोऽयं भरः॥ २६ ॥

दास्यं लास्यवताऽनुमत्य मनसा रङ्गेश्वर त्वत्पदे
    नित्यं किं करवाण्यहं न तु पुनः कुर्यां कदर्याश्रयाम्।
मीलच्चक्षुषि वेल्लित भ्रुणि मुहुर्दत्तावमानाक्षरे
    भीमे कस्यचिदाढ्यकस्य वदने भिक्षाविलक्षां दृशम्॥ २७ ॥

त्वय्येकाञ्जलि किंकरे तनुभृतां निर्व्याज सर्वंसहे
    कल्याणात्मनि रङ्गनाथ कमला कान्ते मुकुन्दे स्थिते।
स्वामिन् पाहि दयस्व देव कुशलिन् जीव प्रभो भावयेति
    आलापानवलेपिषु प्रलपितुं जिह्रेति जिह्वा मम॥ २८ ॥

त्वयि सति रङ्गधुर्य शरणागत कामदुघे
    निरुपधिक प्रवाह करुणा परिणाहवति।
परिमित देश काल फलदान् फलदाकृतिकान्
    कथमधिकुर्महे विधि शिव प्रमुखानमुकान्॥ २९ ॥

ओमित्यभ्युपगम्य रङ्गनृपतेऽनन्योचितां शेषतां
    स्वातन्त्र्यादिमयीमपोह्य महतीमाद्यामविद्यास्थितिम्।
नित्यासंख्य विसीम भूति गुणयोर्यायामनायासतः
    सेवा संपदमिन्दिरेश युवयोरैकान्तिकात्यन्तिकीम्॥ ३० ॥

आचार्यात् रङ्गधुर्य द्वय समधिगमे लब्धसत्तं तदात्वे
    विश्लिष्टाश्लिष्ट पूर्वोत्तर दुरित भरं यापितारब्ध देहम्।
नीतं त्वत्कैस्त्वया वा निरवधिक दयोद्भूत बोधादिरूपं
    त्वद्भोगैक स्वभोगं दयितमनुचरं त्वत्कृते मां कुरुष्व॥ ३१ ॥

विधानं रङ्गेशादधिगतवतो वेङ्कट कवेः
स्फुरद्वर्णं वक्त्रे परिकलयतां न्यास तिलकम्।
इहामुत्राप्येष प्रणत जन चिन्तामणि गिरिः
स्व पर्यङ्के सेवां दिशति फणि पर्यङ्क रसिकः॥ ३२ ॥

॥ इति श्रीन्यासतिलकं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥